# SvastiHaste ! Namaste (Devi Stotram)

# સ્વસ્તિ-હસ્તે ! નમસ્તે (દેવી-સ્તોત્રમ્)

## Document Information


Text title : Svastihaste Namaste (Devi Stotram)

File name : svastihastenamaste.itx

Category : devii, durgA, panchaka, hkmeher

Location : doc_devii

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Stavarchana-Stavakam (Sanskrit Stotra-Kavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 16, 2023

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


October 16, 2023

*sanskritdocuments.org*

SvastiHaste ! Namaste (Devi Stotram)

# સ્વસ્તિ-હસ્તે ! નમસ્તે (દેવી-સ્તોત્રમ્)

સમ્માન્યા સ્વીય-નામ્ના મહતિ જગતિ યા દુર્ગતેર્નાશયિત્રી
દૈત્યાનાં દારયિત્રી દર-દુરિત-કૃતાં ચણ્ડ-મુણ્ડાદિ-હન્ત્રી ।
ચણ્ડી વૈ ખણ્ડિતાઘા પ્રહરણ-નિવહૈર્મણ્ડિતાઙ્ગી પ્રચણ્ડા
દુર્ગે ! ત્વં દુઃખ-દાહં કુરુ ભુવિ કૃપયા લોક-કલ્યાણમાર્ગે ॥ ૧॥

આશીર્વાદં પ્રદેહિ પ્રણતજન-કૃતે સર્વદા શર્વજાયા
રુદ્રાણી ત્વં સુભદ્રં વિતર ચિરદિનં શક્તિરાઘા સુવિધા ।
નિત્યા કાત્યાયની ત્વં દહ કલિ-કલુષં કાલિકા કાલરૂપા
મૂર્ત્તિસ્તે સૌમ્ય-ભીમા તિરયતુ નિતરાં ભીતિમાતઙ્કજાલમ્ ॥ ૨॥

સિંહાસીના સુહાસા વિદલિત-મહિષા દિવ્યભાસા વિભાન્તી
મહ્યાં મોહાદિ-હન્ત્રી ગણપતિ-જનની મોહિની માનનીયા ।
મન્દારૈર્મોદયન્તી રુચિર-હિમગિરેર્નન્દિની સ્કન્દમાતા
વન્દ્યા ગીર્વાણ-વૃન્દૈર્હર હર-દયિતે ! સ્વાન્ત-સન્તાપજાતમ્ ॥ ૩॥

હિંસા-દ્વેષાદિ-વૈરં ક્ષપયતુ નિયતં તેઽનુકમ્પા પ્રકામં
ભક્તિ-પ્રેમ-પ્રસૂનં પ્રવિતરતુ જને સ્વસ્તિ-હસ્તે ! નમસ્તે ।
સૌહાર્દં હાસ્ય-મોદં પ્રદિશતુ કરુણા પાવની તાવકીના
મધ્યેવિશ્વં સુરાધ્યં પ્રસરતુ સરસં સામ્મનસ્યં પ્રશસ્યમ્ ॥ ૪॥

સૌન્દર્યાનન્દ-ધાત્રી ત્વમિહ સુમહિતા વન્દનીયા વદાન્યા
હે માતઃ ! પ્રાર્થનેયં વિનય-સમુદિતા પાદ-પદ્મે ત્વદીયે ।
સર્વાન્ દોષાન્ ક્ષમસ્વ પ્રશમય સદયં વેદના-દૈન્ય-ભારં
બુદ્ધિર્વિદ્યા સમૃદ્ધિર્વિલસતુ સબલં સાદરં તે પ્રસાદૈઃ ॥ ૫॥

ઇતિ “સ્વસ્તિ-હસ્તે ! નમસ્તે” નામ દેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

– રચયિતા : ડૉ હરેકૃષ્ણ-મેહેરઃ

Copyright Dr.Harekrishna Meher

*SvastiHaste ! Namaste (Devi Stotram)*

pdf was typeset on October 16, 2023

Please send corrections to *sanskrit@cheerful.com*